# LITERATURE SET TEXT EXTRACTS
# IGCSE 2019 onwards

**STUDENT STUDY AID**

25.2.17

# Contents

PROSE SET TEXTS ..... 4
Mahābhārata Stories (adapted) ..... 4
Story 1: Bhīṣma carries off three princesses ..... 5
Story 2: The Pāṇḍavas are born ..... 7
Story 3: King Duṣyanta marries Śakuntalā ..... 9
Story 4: A vulture tests King Śibi's virtue ..... 11
Story 5: Arjuna defeats Karṇa ..... 13
Story 6: Kṛṣṇa is shot by a hunter ..... 15
Hitopadeśa Stories ..... 17
Introduction to the Hitopadeśa ..... 19
Part One: King Sudarśana reflects upon his sons' lack of education. ..... 19
Part Two: King Sudarśana asks an assembly of the wise for help. ..... 22
The old tiger and the traveller - Part One ..... 25
The old tiger and the traveller - Part Two ..... 29
The old tiger and the traveller - Part Three ..... 33
Hitopadeśa: The brahmin and his faithful ichneumon – Part One ..... 36
Hitopadeśa: The brahmin and his faithful ichneumon – Part Two ..... 39
VERSE SET TEXT ..... 42
The Bhagavad Gītā ..... 42
Chapter 1 v 36 ..... 43
Chapter 1 v 47 ..... 43
Chapter 2 v 3 ..... 44
Chapter 2 v 22 ..... 44
Chapter 2 v 48 ..... 45
Chapter 2 v 65 ..... 45
Chapter 3 v 19 ..... 46
Chapter 3 v 21 ..... 46
Chapter 3 v 30 ..... 47
Chapter 3 v 35 ..... 47
Chapter 4 v 10 ..... 48
Chapter 4 v 19 ..... 48
Chapter 5 v 10 ..... 49
Chapter 9 v 4 ..... 49
Chapter 9 v 7 ..... 50
Chapter 9 v 26 ..... 50

Chapter 10 v 3 .......... 51
Chapter 15 v 12 .......... 51
Chapter 18 v 53 .......... 52
Chapter 18 v 56 .......... 52

# PROSE SET TEXTS

## Mahābhārata Stories (adapted)

These stories are extracted from, or based on
'Stories from the Mahābhārata' by Warwick and Elena Jessup.
Publ. Motilal Banarsidass Pvt Ltd.

## Story 1: Bhīṣma carries off three princesses

Satyavatī's son, Vicitravīrya, becomes king. Bhīṣma, worried that Vicitravīrya is not married, goes to a *svayaṃvara*. At the *svayaṃvara*, Bhīṣma carries off three princesses. Bhīṣma grants one of the princesses her freedom, as she is already secretly pledged to someone else, but the other two marry Vicitravīrya.

1. सत्यवत्याः पुत्रः विचित्रवीर्यः नाम।
2. कालेन विचित्रवीर्यः नृपः अभवत्।
3. यदि विचित्रवीर्यस्य भार्या न भविष्यति तर्हि युवराजः न भविष्यति इति भीष्मः चिन्तयति स्म।
4. स्वयंवरः आसीत्।
5. बहवः राजपुत्राः स्वयंवरम् अगच्छन्।
6. तत् दृष्ट्वा भीष्मः अपि स्वयंवरम् अगच्छत्।
7. स्वयंवरे भीष्मेण कन्याः अपहृताः।
8. ताः कन्याः अम्बा अम्बिका अम्बालिका च।
9. राजपुत्राः विस्मिताः आसन् भूमिम् अपतन् च।
10. अम्बा भीष्मेण मुक्ता।

| | | | |
|---|---|---|---|
| विचित्रवीर्य | (m) Vicitravīrya | अम्बा | (f) Ambā |
| युवराज | (m) heir apparent | अम्बिका | (f) Ambikā |
| स्वयंवर | (m) self-choice ceremony | अम्बालिका | (f) Ambālikā |
| कालेन | in time | विस्मित | (mfn) amazed |

| | | | |
|---|---|---|---|
| अप-हृत | (mfn) carried off | मुक्त | (mfn) freed |

**IGCSE vocabulary**

| | | | |
|---|---|---|---|
| चिन्तयति | he thinks | कन्या | (f) girl, maiden |
| राजपुत्र | (m) prince | भूमिः | (f) ground / earth |
| अपि | also / even | बहु | (mfn) much |
| पुत्र | (m) son | नाम | named |
| नृप | (m) king | यदि / तर्हि | if ... then |
| भार्या | (f) wife | चिन्तयति | thinks |
| स्म | changes the present tense of the verb into the past | पतति | he falls |
| | | दृष्ट्वा | having seen |
| गच्छति | goes | | |

## Story 2: The Pāṇḍavas are born

A deer has cursed Pāṇḍu. Because of this curse, Pāṇḍu cannot have children. However, when Kuntī was a teenager, she had been given a magical word (mantra) to give birth to three sons. Yudhiṣṭhira is fathered by Dharma, the god of law. Bhīma is fathered by Vāyu, the god of the wind. Arjuna is fathered by Indra, the king of the gods. Kuntī also shares the magical word with Mādrī, who gives birth to the twins Nakula and Sahadeva, who are fathered by the Aśvins, the twin gods of the dawn.

1. मृगस्य वचनानि श्रुत्वा पाण्डुः दुःखेन अचिन्तयत् कथम् मम पुत्राः भविष्यन्ति इति।
2. पुरा तु यदा कुन्ती कन्या तदा ऋषिः तस्यै कम् अपि मन्त्रम् अददात्।
3. तेन मन्त्रेण कः चन देवः तुभ्यम् पुत्रम् दास्यति इति ऋषिः अवदत्।
4. सूर्यम् चिन्तयित्वा कुन्ती मन्त्रम् अवदत्।
5. सूर्यः ताम् आगम्य तस्यै पुत्रम् अददात्।
6. सः पुत्रः कर्णः नाम।
7. सः तु कुन्त्या त्यक्तः।
8. एवम् पञ्च पुत्राः मन्त्रेण जाताः।
9. तेषाम् जनकाः देवाः।
10. ते युधिष्ठिरः भीमः अर्जुनः नकुलः सहदेवः च॥

| | | | |
|---|---|---|---|
| मन्त्र | (m) mantra | युधिष्ठिर | (m) Yudhiṣṭhira |
| भीम | (m) Bhīma | अर्जुन | (m) Arjuna |
| नकुल | (m) Nakula | सहदेव | (m) Sahadeva |
| कः चन | (m) someone, (mfn) some | त्यक्त | (mfn) abandoned |

| | |
|---|---|
| कुन्ती | (f) mother of Yudhiṣṭhira, Bhīma and Arjuna |

**IGCSE Vocabulary:**

| | | | |
|---|---|---|---|
| मृग | (m) deer | श्रुत्वा | having heard |
| पञ्च | (mfn) five | जात | (mfn) born |
| देव | (m) god | सूर्य | (m) sun |
| कर्ण | (m) Karṇa | वचनम् | (n) word |
| ददाति | he gives (दास्यति he will give) | | |

## Story 3: King Duṣyanta marries Śakuntalā

Many incidental stories are told during the course of the Mahābhārata, as for example the story of Śakuntalā. Her son, Bharata, was the founder of the whole dynasty featured in the Mahābhārata which can be translated as 'The great tale of the Bharata dynasty'. King Duśyanta is out hunting and comes to the hermitage of the sage Kaṇva. There he meets a beautiful girl (Śakuntalā) and falls in love with her. Śakuntalā explains that she is the daughter of Viśvāmitra and Menakā. Duśyanta marries Śakuntalā, and their son (Bharata) becomes the next king.

1. राजा दुष्यन्तः सैनिकैः सह वने मृगम् अन्वधावत्।
2. अन्ततः सः धीमतः कण्वस्य आश्रमम् आगच्छत्।
3. तत्र दुष्यन्तः अतीव सुन्दरीम् कन्याम् अपश्यत्।
4. सः तस्याम् अनन्तरम् अस्निह्यत्।
5. का त्वम् इति अपृच्छत् दुष्यन्तः।
6. अहम् शकुन्तला नाम विश्वामित्रस्य दुहिता।
7. मम माता मेनका माम् वने अत्यजत्।
8. जलम् पिब अन्नम् खाद च इति अवदत् कन्या।
9. अचिरेण तयोः विवाहः आसीत्।
10. तयोः पुत्रः भरतः नाम आसीत्।
11. सः सिंहान् गृहीत्वा तैः सह अक्रीडत्।
12. दुष्यन्तः राजगृहम् पुनः अगच्छत्।
13. चिरेण भरतः आश्रमे अवसत्।
14. अन्ते तु भरतः पुनः पितरम् आगच्छत् राजा अभवत् च॥

| | | | |
|---|---|---|---|
| धीमत् | (mfn) wise | दुहितृ | (f) daughter |
| विवाह | (m) marriage | | |

**IGCSE Vocabulary**

| | | | |
|---|---|---|---|
| राजन् | (m) king | मातृ | (f) mother |
| कन्या | (f) daughter, girl | सैनिक | (m) soldier |
| जलम् | (n) water | मृग | (m) deer |
| वनम् | (n) forest | अन्न | (n) food |
| राजगृहम् | (n) palace | आश्रम | (m) hermitage |
| पितृ | (m) father | सुन्दरी | (f) beautiful |
| त्वम् | you | का | (f) who? what? |
| अहम् | I | अन्ततः | finally |
| अचिरेण | soon | तत्र | there |
| पुनर् (पुनः) | again | अतीव | very |
| अन्ते | in the end | अनन्तरम् | straight away |
| धावति | he runs | गच्छति | he goes |
| पश्यति | he sees | स्निह्यति | he is fond of, falls in love with (+ 7th) |
| पृच्छति | he asks | त्यजति | he leaves |
| क्रीडति | he plays | पिबति | drinks |
| गृहीत | (mfn) grabbed | खादति | eats |
| चिरम् / चिरेन | for a long time | तु | but |

## Story 4: A vulture tests King Śibi's virtue

A pigeon, hunted by a vulture, asks for King Śibi's protection. The king grants this, but the vulture insists on having instead some of Śibi's own flesh in order to guarantee the pigeon's safety. Śibi gives him some of his flesh but the vulture asks for more. Śibi gives generously, and thereby saves the pigeon. The vulture praises Śibi.

1. शिबिः नृपः आसीत्।
2. एकदा कपोतः तम् आगच्छत्।
3. हे प्राज्ञ नृप गृध्रः माम् खादिष्यति इति कपोतः अवदत्।
4. शिबिः प्रत्यवदत् अहम् त्वाम् रक्षिष्यामि इति।
5. गृध्रः तु नृपस्य वचनम् श्रुत्वा अवदत् हे नृप यस्मात् त्वम् कपोतम् मह्यम् न ददासि तस्मात् तव मांसम् देहि इति।
6. शिबिः स्वदेहात् मांसम् छित्त्वा तत् गृध्राय अददात्।
7. गृध्रः तु संतुष्टः न आसीत्।
8. नृपेण स्वदेहात् मांसम् पुनः छिन्नम्।
9. अन्ते गृध्रः संतुष्टः अभवत्।
10. एवम् कपोतः रक्षितः।
11. गृध्रः अवदत् त्वम् श्रेष्ठः नृपः लोके इति॥

| | | | |
|---|---|---|---|
| कपोत | (m) pigeon | मांसम् | (n) meat, flesh |
| यस्मात् | since | देहि | give! (*sing. imperative)* |
| स्वदेह | (m) own body | छित्त्वा | (m) having cut |
| लोक | (m) world | | |

**IGCSE vocabulary**

| | | | |
|---|---|---|---|
| नृप | (m) king | वचन | (n) statement |
| प्राज्ञ | (mfn) wise | गृध्र | (m) vulture |
| अन्त | (m) end | श्रेष्ठ | (mfn) best |
| छिन्न | cut | संतुष्ट | (mfn) contented |
| एकदा | once | एवम् | thus |
| पुनः | again | प्रतिवदति | he replies |
| रक्षति | he protects | ददाति | he gives |

## Story 5: Arjuna defeats Karṇa

Karṇa was a *kṣatriya*. When he wanted to be given special training in weapons by Bhārgava, he lied to Bhārgava, maintaining he was a *brāhmaṇa*. Bhārgava hated *kṣatriyas*, and would not have taught Karṇa if he had known the truth. When Bhārgava discovered the lie he cursed Karṇa. The curse was that the special mantra which Bhārgava had taught Karṇa would be forgotten when Karṇa most needed it. In the story in this chapter, when Karṇa meets Arjuna in battle, at the crucial moment
Karṇa cannot remember the mantra which could have defeated Arjuna.

1. अर्जुनः कर्णेन सह युद्धम् अकरोत्।
2. कर्णः अर्जुनस्य शिरः प्रति शरम् अक्षिपत्।
3. तस्मिन् एव काले तु कृष्णस्य मायया अर्जुनस्य रथः पङ्के निमग्नः।
4. तस्मात् कर्णस्य शरः अर्जुनस्य शिरः न अतुदत्।
5. रथः तु तस्मात् पङ्कात् पुनर् निरगच्छत्।
6. ततः कर्णस्य रथः अपि पङ्के निमग्नः।
7. रथस्य चक्रम् पङ्के अतिष्ठत्।
8. कर्णः रथात् अवरुह्य अर्जुनम् अवदत् शरम् न क्षिप इति।
9. अर्जुनेन युद्धस्य धर्मः ज्ञातः।
10. ततः सः न किम् चित् अकरोत्।
11. कृष्णः अर्जुनम् अवदत् पूर्वम् धर्मः कर्णेन न कदा अपि कृतः।
12. धर्मः धार्मिकम् एव नरम् रक्षति इति।
13. तत् श्रुत्वा अर्जुनः कर्णम् व्यापादयत्॥

| | | | |
|---|---|---|---|
| शिरस् | (n) head | निमग्न | (mfn) sunk |
| पङ्क | (m) mud | माया | (f) magic |

**IGCSE vocabulary**

| | | | |
|---|---|---|---|
| शर | (m) arrow | कर्ण | (m) ear |
| धर्म | (m) righteousness, justice | सह | (+ 3rd ) together with |
| पुनः | again | प्रति | (+ 3rd ) towards |
| ततः | after that, therefore, hence | एव | only, indeed, exactly |
| अपि | also, even | तु | but, now, verily 1 |
| पूर्वम् | (+ 5th ) before | तस्मात् | therefore |
| क्षिपति | he throws | तुदति | he hits |
| निर्गच्छति | he goes out | तिष्ठति | he stands |
| शृणोति | he hears | चक्र | (n) wheel |
| न किंचित् | nothing | अवरोहति | climbs down |
| न कदापि | never | ज्ञात | (mfn) known |
| काल | (m) time | | |

### Story 6: Kṛṣṇa is shot by a hunter

When Kṛṣṇa lies down, his feet are mistaken by a hunter for the ears of a forest animal. The hunter shoots his arrow, which enters Kṛṣṇa's body. The hunter is horrified on discovering what has happened, but Kṛṣṇa tells him not to fear and assures the hunter that he will go to heaven for the deed, which fulfilled destiny. Kṛṣṇa tells his charioteer that he will now depart from the world and gives him some final advice.

1. कृष्णः वृक्षस्य अधः उपाविशत्।
2. एकः व्याधः कृष्णस्य समीपे अचरत्।
3. तेन व्याधेन कृष्णस्य पादौ एव दूरे दृष्टौ।
4. व्याधः अचिन्तयत् मृगः वृक्षस्य अधः अस्ति इति।
5. व्याधः शरम् शीघ्रम् अक्षिपत्।
6. व्याधस्य शरः कृष्णम् प्राविशत्।
7. कृष्णम् आगम्य व्याधः दुःखेन अक्रोशत् हे कृष्ण माम् व्यापदय इति।
8. कृष्णः तु अवदत् हे व्याध अभीतः भव।
9. त्वम् स्वर्गम् गमिष्यसि इति।
10. तदा व्याधः स्वर्गम् अगच्छत्।
11. कृष्णस्य सूतः तत्र आगच्छत्।
12. सूतः कृष्णाय अनमत्।
13. कृष्णः तम् अवदत् इदानीम् लोकात् गच्छामि।
14. संतुष्टः भव।

15. धर्मम् कुरु।

16. ज्ञानम् लभस्व इति।

| | | | |
|---|---|---|---|
| अधः | (+ 6th case) beneath | पाद | (m) foot |
| व्याध | (m) hunter | अभीत | (mfn) fearless |
| सूत | (m) charioteer | स्वर्ग | (m) heaven |
| लभस्व | find! (imperative) | | |

**IGCSE vocabulary**

| | | | |
|---|---|---|---|
| वृक्ष | (m) tree | स्वर्ग | (m) heaven |
| पाद | (m) foot | धर्म | (m) righteousness |
| मृग | (m) deer | ज्ञानम् | (n) knowledge |
| शर | (m) arrow | दृष्ट | (mfn) seen |
| एक | (m) one, a certain | संतुष्ट | (mfn) contented |
| अधः | beneath | तु | but |
| दूरे | far away | तत्र | there |
| शीघ्रम् | quickly | इदानीम् | now |
| दुःखेन | unhappily | उपविशति | he sits down |
| चिन्तयति | he thinks | अस्ति | he is, exists |
| क्षिपति | he throws | क्रोशति | he cries out |
| व्यापादयति | he kills | आगच्छति | he comes |
| समीपे | (+ 6th case) near | चरति | he walks |
| प्रविशति | enters | लोक | (m) world |
| नमति | bows | | |

# Hitopadeśa Stories

The first of the original Sanskrit texts is from a work called the *Hitopadeśa.* The word *'hitopadeśa'* means 'good advice', as this text was intended to instruct nobility in politics and ethics. It is a collection of fables, most of which involve animals. Within the text, the stories are framed by another story.

A king had some wild sons who were unteachable by normal methods. He became so worried that he sent out a proclamation asking if there was anyone who could teach them the science of statesmanship. Finally, the sage Viṣṇuśarman stepped forward and offered to teach them by means of fables.

These stories in the *Hitopadeśa* are expressed in both prose and verse. The prose sections narrate the story, while the verses are reserved for morals and themes.

[Note to teacher: This passage and subsequent set texts in this series of books need to be thoroughly prepared by the students with your help.]

PRESENTATION:

- IGCSE vocabulary which appears in each extract is given before the story for learning and revision purposes.
- The extract appears with some words, given on the next page, underlined.
- The page following each story gives the underlined vocabulary and help with some of the *samāsas*.

## Introduction to the Hitopadeśa - Part One.

**Words from the IGCSE vocabulary occur in the following story. Any closely related words are also noted:**

| | |
|---|---|
| अनेक (mfn) | (like तत् except neut. sing.) many |
| अपि | also, even though |
| अस्ति | is |
| आत्मनः | his own / her own |
| इति | thus |
| एकदा | once, at the same time |
| एव | only, indeed, |
| क (m) | who? what? |
| किम् (n) | what? |
| केवलम् | only |
| गुण (m) | virtue |
| चिन्तयति | thinks (चिन्तयामास he reflected) |
| जात (mfn) | born, arisen |
| तत्र | there |
| तीर (n) | bank, shore |
| तु | but, now, verily |
| द्वि (mfn) | two |
| धन (n) | riches, wealth |
| धार्मिक (mfn) | righteous, just |
| न | no, not |
| नगर (n) | city |
| नर (m) | man |
| नाम | by name |
| नित्यम् | ever, always |
| पठति | reads (पठ्यमान being read) |
| पति (m) | husband, lord |
| पुत्र (m) | son |
| पुनः | again |
| य (m) | (like तत्) who, which |
| राजन् (m) | king |
| वा | or |
| शृणोति | hears (शुश्राव he heard (perfect tense)) |
| स (m) | he |
| सर्व (mfn) | (like तत् except neut. sing.) all |
| स्वामिन् (m) | master |

## Introduction to the Hitopadeśa

**Part One: King Sudarśana reflects upon his sons' lack of education.**

NOTE: Use transliteration for Sanskrit names in your translation.

अस्ति भागीरथीतीरे पाटलिपुत्रनामधेयं नगरम् । तत्र सर्वस्वामिगुणोपेतः सुदर्शनो नाम नरपतिरासीत् । स भूपतिरेकदा केनापि पठ्यमानं श्लोकद्वयं शुश्राव ।

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥
यौवनं धनसंपत्तिः प्रभुत्वमविवेकता ।
एकैकमप्यनर्थाय किं पुनस्तु चतुष्टयम् ।

इत्याकर्ण्यात्मनः पुत्राणामनधिगतशास्त्राणां नित्यमुन्मार्गगामिनां शास्त्राननुष्ठानेनोद्विग्नमनाः स राजा चिन्तयामास ।

कोऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्मिकः ।
काणेन चक्षुषा किं वा चक्षुःपीडैव केवलम् ॥

| | | | |
|---|---|---|---|
| नामधेय n | named | प्रभुत्व n | power |
| गुण m | virtue | अविवेकता f | inconsiderateness |
| उपेत mfn | possessed of | एकैकम् ind | singly |
| नरपति m | king | अनर्थ mfn | disadvantage |
| भूपति m | king | चतुष्टय mfn | four |
| पठ्यमान mfn | being read (pres. pass. part.) | आकर्ण्य ind | having heard |
| श्लोक m | verse | अनधिगत mfn | unread |
| संशय m | doubt | उन्मार्ग mfn | improper |
| उच्छेदिन् mfn | resolver | गामिन् mfn | ways, courses of action |
| परोक्ष mfn | invisible<br>परस्- beyond –अक्ष sight | शास्त्र m | scripture |
| अर्थ m | object; benefit | अननुष्ठान n | not carrying out, not attending to |
| लोचन mfn | eye | उद्विग्नमनाः m | he, distressed in mind (masc) |
| दर्शक mfn | revealer | विद्वान् m | wise |
| शास्त्र n | scripture, true learning | काण mfn | sightless |
| अन्ध mfn | blind | चक्षुस् n | eye |
| यौवन n | youth | पीडा f | trouble |
| संपत्ति f | endowment (with) | | |

Help with some samāsas:

| | |
|---|---|
| possessed of every lordly virtue | सर्व-स्वामि-गुण-उपेतः |
| resolver of many doubts [उच्छेदि is 1st case masc. of उच्छेदिन्] | अनेक-संशय-उच्छेदि |
| of invisible objects | परोक्ष-अर्थस्य |
| abundance of riches | धन-संपत्तिः |
| of those unread in literature | अनधिगत-शास्त्राणाम् |
| of those following improper courses (of behaviour) | उन्मार्ग-गामिनाम् |
| by inattention to learning | शास्त्र-अननुष्ठानेन |
| he, distressed in mind | उद्विग्न-मनाः |
| trouble from an eye | चक्षुः-पीडा |

## Introduction to the Hitopadeśa - Part Two.

**Words from the IGCSE vocabulary occur in the following story. Any closely related words are also noted:**

| | |
|---|---|
| अब्रवीत् | said |
| अस्ति | is |
| अहम् | I am (मम my, मया by me) |
| इदानीम् | now |
| इव | like, as if |
| उक्त (mfn) | said, spoken to, addressed |
| उवाच | he/she said |
| एक° (like तत् except neut. sing.) | one, a certain |
| एतत् (n) | this |
| एति | goes |
| च | and |
| चिन्तयति | thinks |
| -ज्ञ (mfn) | knower of |
| तत् ( in a compound indicates any form of तत् e.g. तस्य ) | that |
| तथा | just so |
| देव (m) | god, lord |

| | |
|---|---|
| नित्यम् | ever, always |
| पण्डित (mfn) | wise, learned |
| पुनः | again |
| महत् (mfn) | great |
| यत् (n), यः (m), या (f), (like तत्) | who, which |
| यतः | since |
| याति | goes |
| राजन् (m) | king |
| राजपुत्र (m) | prince |
| शक्नोति | is able (शक्यन्ते is able) |
| शृणोति | hears (श्रूयताम् polite imperative 'listen!) |
| स (m) | he |
| समर्थ (mfn)(+ 4th, 6th or 7th) | capable, fit for |
| सह (+ 3rd) | together with |
| हि | indeed, for |

## Part Two: King Sudarśana asks an assembly of the wise for help.

एतच्छिन्तयित्वा स राजा पण्डितसभां कारितवान् । राजोवाच ।

भो भोः पण्डिताः । श्रूयताम् । अस्ति कश्चिदेवंभूतो विद्वान्यो मम पुत्राणां नित्यमुन्मार्गगामिनामनधिगतशास्त्राणामिदानीं नीतिशास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थः ।

यतः । काचः काञ्चनसंसर्गाद्धत्ते मारकतीं द्युतिम् ।
तथा सत्संनिधानेन मूर्खो याति प्रवीणताम् ॥

उक्तं च । हीयते हि मतिस्तात हीनैः सह समागमात् ।
समैश्च समतामेति विशिष्टैश्च विशिष्टताम् ॥

अत्रान्तरे विष्णुशर्मनामा महापण्डितः सकलनीतिशास्त्रतत्त्वज्ञो बृहस्पतिरिवाब्रवीत् । देव । महाकुलसंभूता एते राजपुत्राः । तन्मया नीतिं ग्राहयितुं शक्यन्ते ।

| | | | |
|---|---|---|---|
| सभा f | assembly | मूर्ख m | fool |
| कारितवान् m | he made (tavat-ending word) | प्रवीणता f | cleverness |
| एवंभूत mfn | of such a quality or nature; such | हीयते | is lowered |
| विद्वान् m | possessing wisdom | मति f | mind, thought |
| उन्मार्ग m | improper, or evil, ways | तात m | O son |
| गामिन् mfn | going or moving (in) | हीन mfn | low |
| शास्त्र m | scripture | समागम m | association (with) |
| अनधिगत mfn | unread | सम mfn | same |
| नीति f | moral conduct, political science | समता f | sameness, equality |
| उपदेश m | a teaching | विशिष्ट mfn | distinguished, special |
| जन्म n | birth, rebirth | विशिष्टता f | distinction |
| काच m | glass | अत्रान्तरे ind | hereupon, at this juncture |
| काञ्चन n | gold | सकल mfn | complete, all |
| संसर्ग m | association (with) | तत्त्व mfn | essence |
| धत्ते | acquires, gains | बृहस्पति m | name of deity, chief of prayers and devotion |
| मारकती f | emerald | कुल n | family |
| द्युति f | sheen, lustre | संभूत mfn | born |
| सत् n | the good | ग्राहयितुम् | to grasp (infinitive) |
| संनिधान m | proximity to | | |

Help with some samāsas:

| | |
|---|---|
| by instruction in moral conduct | नीति-शास्त्र-उपदेशेन |
| regeneration | पुनर्-जन्म |
| of those wayward | उन्मार्ग-गामिनाम् |
| of those ignorant | अनधिगत-शास्त्राणाम् |
| because of association with gold | काञ्चन-संसर्गात् |
| by proximity to the good | सत्-संनिधानेन |

| | |
|---|---|
| conversant with the gist of all books on policy | सकल-नीति-शास्त्र-तत्त्व-ज्ञः |
| those born in a high family | महा-कुल-संभूताः |

## The old tiger and the traveller - Part One

**Words from the IGCSE vocabulary occur in the following story. Any closely related words are also noted:**

| | |
|---|---|
| अपि | also, even though |
| अब्रवीत् | said |
| अयम् (m) | this |
| अरण्य (n) | forest |
| अस्ति | is |
| आत्मन् (m) | one's self |
| इदम् (n) | this |
| उक्त (mfn) | said, spoken to, addressed |
| उवाच | he/she said |
| एक° (like तत् except neut. sing.) | one, a certain |
| एतत् (n) | this |
| एव | only, indeed, |
| क (m) | who? what? |
| किम् (n) | what? |
| कुत्र | where? |
| च | and |
| चरति | walks |
| जायते | is born |
| जीवति | lives |
| तत् ( in a compound indicates any form of तत् e.g. तस्य ) | that |
| ततः | after that, therefore, hence |
| तथा | just so |
| तावत् | for so long, meanwhile, now |
| तीर (n) | bank, shore |
| तु | but, now, verily |
| त्वम् | you (1st case sing.) |
| न | no, not |
| नर (m) | man |
| पश्यति | sees |
| भय (n) | fear |
| मृत्यु (m) | death |
| यत् (n), यः (m), या (f), (like तत्) | who, which |
| यत्र | where |
| वचन (n) | statement, command |
| वदति | says |
| वृद्ध (mfn) | old, increased |
| व्याघ्र (m) | tiger |
| शृणोति | hears (शृणु listen!) |
| सरस् (n) | lake |
| सर्वत्र | everywhere |
| सुवर्ण (mfn) | golden, gold |
| हस्त (m) | hand |

The old tiger and the traveller

Part One: An old tiger offers a golden bracelet to a passing traveller

अहमेकदा दक्षिणारण्ये चरन्नपश्यम् । एको वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते । भो भोः पान्थाः । इदं सुवर्णकङ्कणं गृह्यताम् । तद्वचनमाकर्ण्य भयात्कोऽपि तत्पार्श्वं न भजते । ततो लोभाकृष्टेन केनचित्पान्थेनालोचितम् । भाग्येनैतत्संभवति । किं त्वस्मिन्नात्मसंदेहे प्रवृत्तिर्न विधेया । यतः

अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा ।
यत्रास्ति विषसंसर्गोऽमृतं तदपि मृत्यवे ॥

किं तु सर्वत्रार्थार्जने प्रवृत्तिः संदेह एव । तथा चोक्तम् ।

न संशयमनारुह्य नरो भद्राणि पश्यति ।
संशयं पुनरारुह्य यदि जीवति पश्यति ॥

तन्निरूपयामि तावत् । प्रकाशं ब्रूते । कुत्र तव कङ्कणम् । व्याघ्रो हस्तं प्रसार्य दर्शयति । पान्थोऽवदत् । कथं मारात्मके त्वयि विश्वासः । व्याघ्र उवाच । शृणु रे पान्थ ।

**Underlined Vocabulary**

| | | | |
|---|---|---|---|
| दक्षिण mfn | Southern | संदेह m | risk |
| चरन् m | he, walking | प्रवृत्ति f | activity |
| वृद्ध mfn | old | विधेय mfn | to be practised |
| व्याघ्र m | tiger | इष्ट mfn | desired |
| स्नात mfn | bathed | गति f | result |
| कुश m | kuśa grass | शुभ mfn | fortunate |
| सरस् n | lake | विष n | poison |
| तीर n | bank | संसर्ग m | association |
| पान्थ m | traveller<br>पान्थाः vocative | अर्जन n | procuring |
| सुवर्ण mfn | golden | संशय m | doubt |
| कङ्कण n | bracelet | आरुह्य ind | having climbed |
| गृह्यताम् | let it be accepted | भद्र n | good thing |
| भय n | fear, danger | निरूपयति | investigate |
| पार्श्व n | vicinity | तावत् ind | a little |
| भजते | one encourages, cultivates | प्रकाश ind | aloud |
| लोभ m | greed | प्रसार्य ind | having stretched forth |
| आकृष्ट mfn | attracted | मारे mfn | killing / killer |
| आलोचित mfn | considered, reflected | आत्मक mfn | by nature |
| भाग्य n | good fortune | विश्वास m | confidence |
| संभवति | it arises | | |

Help with some samāsas:

in the Southern forest — दक्षिण-अरण्ये

an old tiger — वृद्ध-व्याघ्रः

with kuśa- grass in his paw — कुश-हस्तः

| | |
|---|---|
| on the banks of a lake | सरस्-तीरे |
| golden bracelet | सुवर्ण-कङ्कणम् |
| his words | तत्-वचनम् |
| his proximity | तत्-पार्श्वम् |
| attracted by greed | लोभ-आकृष्टेन |
| personal risk | आत्म-संदेहे |
| In the acquisition of the desired | इष्ट-लोभे |
| association with poison | विष-संमर्गः |
| in the procuring of wealth | अर्थ-अर्जने |
| by nature a killer | मार-आत्मके |

## The old tiger and the traveller - Part Two

**Words from the IGCSE vocabulary occur in the following story. Any closely related words are also noted:**

अनेक (mfn) (like तत् except neut. sing.) many

अपि also, even though

अयम् (m) this

अष्ट (mfn) eight (अष्टविध eightfold)

अस्ति is

अहम् I am (मे me)

इति thus

इदानीम् now

उक्त (mfn) said, spoken to, addressed

एव only, indeed, exactly

क (m) who? what? (केन अपि by some)

कथम् how?

च and

तत् (in a compound indicates any form of तत् e.g. तस्य) that

ततः after that, therefore, hence

तत्र there

दान (n) gift

धर्म (m) righteousness, justice

धार्मिक (mfn) righteous, just

न no, not

पुत्र (m) son

भवत् you, Your Honour

भूमिः (f) ground (at the end of a samāsa may also mean 'object')

मनुष्य (m) man

मार्ग (m) road

मृत (mfn) dead

वृद्ध (mfn) old, increased

सत्य (n) truth

स्नान (n) bath / bathing

स्मरति remembers (स्मृत remembered, said)

## Hitopadeśa: The old tiger and the traveller

Part Two: The tiger explains that he is a changed character and therefore not dangerous.

प्रागेव यौवनदशायामतिदुर्वृत्त आसम् । अनेकगोब्राह्मणमनुष्यवधान्मे पुत्रा अनेकशो मृता दाराश्च । सांप्रतं निर्वंशोऽस्मि । ततः केनापि धार्मिकेणाहमुपदिष्टः । दानधर्ममाचरतु भवानिति । तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तो दयावांश्च कथं न विश्वासभूमिः। उक्तं च।

इज्याध्ययनदानानि तपः सत्यं क्षमा दमः ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ॥
तत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते ।
उत्तरश्च चतुर्वर्गो नामहात्मसु विद्यते ॥

The old tiger and the traveller - Part two

**Underlined Vocabulary**

| | | | |
|---|---|---|---|
| प्राक् | formerly | दन्त m | tooth |
| यौवन n | youthful | दयावत् mfn | pitiful |
| दशा f | state | विश्वास m | confidence |
| दुर्वृत्त mfn | wicked | इज्या f | sacrifice |
| गो f | cow | अध्ययन n | studying the Vedas |
| ब्राह्मण m | priest, Brahmin class | तपस् n | austerity, penance |
| वध m | slaughter | क्षमा f | fortitude |
| अनेकशः ind | in great numbers | दम m | patience, self restraint |
| दार m | wife | अलोभ m | contentment, moderation |
| सांप्रतम् ind | now | -विध mfn | - fold |
| निर्वंश m | without family | पूर्व mfn | former |
| उपदिष्ट mfn | advised | चतुर्वर्ग | four-fold class |
| आचरतु | may he practise | सेव्यते | is practised |
| उपदेश m | advice | दम्भ m | ostentation |
| शील n | practice | उत्तर mfn | latter |
| दातृ m | giver | न अमहात्मसु | (double negative used for emphasis) among the magnanimous |
| गलित mfn | decayed | विद्यते | is found |
| नख m | claw | | |

Help with some samāsas:

| | |
|---|---|
| in a youthful state | यौवन-दशायाम् |
| excessively wicked | अति-दुर्-वृत्तः |
| through the slaughter of many cows, Brahmins and men | अनेक-गो-ब्राह्मण-मनुष्य-वधात् |
| duty of liberality | दान-धर्मम् |
| because of his advice | तद्-उपदेशात् |
| a practiser of ablutions | स्नान-शीलः |

| | |
|---|---|
| with decayed claws and teeth | गलित-नख-दन्तः |
| object of confidence | विश्वास-भूमिः |
| sacrifice, study, alms-giving | इज्या-अध्ययन-दानानि |

## The old tiger and the traveller - Part Three

**Words from the IGCSE vocabulary occur in the following story. Any closely related words are also noted:**

| | |
|---|---|
| अतः | hence |
| अत्र | here |
| अपि | also, even though |
| असौ (m) | he |
| अस्ति | is |
| इति | thus |
| इदम् (n) | this |
| उक्त (mfn) | said, spoken to, addressed (उक्त्वा having spoken to) |
| उपगच्छति | approaches (उपगम्य having approached) |
| एव | only, indeed, exactly |
| कारण (n) | cause, reason |
| काल (m) | time |
| च | and |
| जात (mfn) | born, arisen |
| तत् (in a compound indicates any form of तत् e.g. तस्य) | that |
| ततः | after that, therefore, hence |
| तत्र | there |
| त्वम् | you (1st case sing.) |
| दान (n) | gift |
| दृष्ट्वा | having seen |
| देश (m) | place, country, (proper place) |
| धर्म (m) | righteousness, justice, law |
| धृत (mfn) | held, seized |
| न | no, not |
| पठति | reads |
| पतति | falls; flies (पतित fallen) |
| प्रविशति | enters (प्राविष्ट entered) |
| महत (mfn) | great |
| यत् (n) (like तत्) | who, which |
| यथा .... तथा | as .... so |
| यावत् .... तावत् | as long as ... ...for so long |
| वदति | says |
| व्याघ्र (m) | tiger |
| शनैः शनैः | gently |
| स (m) | he (तेन by him, by that) |
| सरस् (n) | lake |
| स्नान (n) | bath (स्नत्वा having bathed) |
| स्मरति | remembers (स्मृत remembered, considered as) |

**Hitopadeśa: The old tiger and the traveller**

Part Three: The traveller follows the tiger's advice.

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥

तदत्र सरसि स्नात्वा सुवर्णकङ्कणमिदं प्रतिगृहाण । ततो जातविश्वासो यावदसौ सरः स्नातुं प्रविष्टस्तावदेव महापङ्के निमग्नः पलायितुमक्षमः । पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत् । अहह। महापङ्के पतितोऽसि । अत-स्त्वामुत्थापयामि । इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः स पान्थोऽचिन्तयत् ।

न धर्मशास्त्रं पठतीति कारणं न चापि वेदाध्ययनं दुरात्मनः ।
स्वभाव एवात्र तथातिरिच्यते यथा प्रकृत्या मधुरं गवां पयः ॥

The old tiger and the traveller - Part three

**Underlined Vocabulary**

| | | | |
|---|---|---|---|
| दातव्य mfn | should be given | उत्थापयामि | I will lift |
| दीयते | is given | पान्थ m | traveller |
| अनुपकारिण् mfn | a non- assistant | शास्त्र n | scripture, book, teaching |
| पात्र n | a worthy recipient | वेद m | Veda |
| सात्त्विक mfn | virtuous | अध्ययन n | study, recitation |
| तदत्र ind | therefore | दुरात्मन् m | a villain |
| सुवर्णकङ्कण n | golden bracelet | स्वभाव m | innate nature |
| प्रतिगृहाण | accept (imperative) | अतिरिच्यते | it predominates |
| विश्वास m | confidence | प्रकृति f | nature, character (प्रकृत्या naturally) |
| पङ्क m | mud, quagmire | मधुर mfn | sweet |
| निमग्न mfn | sank | गो f | cow (गवाम् of a cow) |
| पलायितुम् | to escape | पयस् n | milk |
| अक्षमः | he was unable | | |
| अहह ind | Ha! | | |

Help with some samāsas:

| | |
|---|---|
| golden bracelet | सुवर्ण-कङ्कणम् |
| his confidence arisen | जात -विश्वासः |
| a great quagmire | महा-पङ्के |
| lawbook, scriptures | धर्म-शास्त्रम् |

## Hitopadeśa: The brahmin and his faithful ichneumon – Part One

**Words from the IGCSE vocabulary occur in the following story. Any closely related words are also noted:**

अत्र here

अथ then, now

अन्य (mfn) (like तत्) other, another

-अर्थ (mfn) for the sake of

अस्ति is

आगच्छति comes (आगत come, आगच्छत coming)

इदम् (n) this

उक्त (mfn) said, spoken to,

क (m) who? what? (कश्चित् someone)

करोति does, makes (कर्यतव्य should be done, कृत्वा having done)

कर्मन् (n) action

काल (m) time

किंतु but

कृत (+ 6th) for the sake of

गच्छति goes

गत (mfn) gone

च and

चिन्तयति thinks

चिर (n) for a long time

चेत् if

तत् (in a compound indicates any form of तत् e.g. तस्य) that

तथा just so

तद् then

ददाति gives (दातुम् to give)

न no, not

नाम by name

पिबति drinks

पुत्र (m) son

बालक (m) boy

यदि .... तर्हि if .... then

रक्षति protects, saves (रक्षा m. protection)

राजन् (m) king

श्रुत्वा having heard

स (m) he (तस्य his)

सत्वरम् quickly

स्नान (n) bath (स्नातुम् to bathe)

## Hitopadeśa: The brahmin and his faithful ichneumon

Part one: A Brahmin is asked to perform a memorial ceremony by the king

अस्त्युज्जयिन्यां माठरो नाम ब्राह्मणः । तस्य ब्राह्मणी बालापत्यस्य रक्षार्थं ब्राह्मणमवस्थाप्य स्नातुं गता । अथ ब्राह्मणस्य कृते राज्ञः श्राद्धं दातुमाह्वानमागतम् । तच्छ्रुत्वा ब्राह्मणः सहजदारिद्र्यादचिन्तयत् । यदि सत्वरं न गच्छामि तदान्यः कश्चिच्छ्राद्धं ग्रहीष्यति । उक्तं च ।

आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः ।

क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् ॥

किं तु बालकस्यात्र रक्षको नास्ति । तत्किं करोमि । यातु । चिरकालपालितमिमं पुत्रनिर्विशेषं नकुलं बालकरक्षार्थमवस्थाप्य गच्छामि । तथा कृत्वा स तत्र गतः ।

The brahmin and his faithful ichneumon - Part one

**Underlined Vocabulary**

| | | | |
|---|---|---|---|
| उज्जयिनी mfn | Ujjayinī – name of a region | प्रदान n | giving, presentation of an offering, a gift |
| ब्राह्मण m /ब्राह्मणी f | Brahmin | क्षिप्र ind | immediately |
| बालापत्य n | little child | अक्रियमाण mfn | not being done |
| अवस्थाप्य ind | having left in charge | तद-रस m | the best part of that |
| श्राद्ध n | a ceremony for the benefit of a dead relative | रक्षक m | guard, protector |
| आह्वान n | invitation, summons | यातु ind | Be it as it may! |
| महज-दारिद्र्य n | poverty endured from birth, innate poverty | पालित mfn | kept, protected |
| ग्रहीष्यति | will receive | निर्विशेष mfn | no differently from |
| आदान n | taking (for one's self) | नकुल m | ichneumon (mongoose)* |

* https://species.wikimedia.org/wiki/Herpestes_ichneumon

Help with some samāsas:

| | |
|---|---|
| of (their) little child | बाल-अपत्यस्य |
| because of his natural poverty | महज-दारिद्र्यात् |
| kept for a long time | चिर-काल-पालितम् |
| for protection of the babe | बालक -रक्षा-अर्थम् |

## Hitopadeśa: The brahmin and his faithful ichneumon – Part Two

**Words from the IGCSE vocabulary occur in the following story. Any closely related words are also noted:**

| | |
|---|---|
| अतः | hence |
| अनन्तरम् | straight away |
| अब्रवीत् | said (ब्रवीमि I say) |
| अयम् (m) | this (अनेन by this) |
| असौ (m) | he |
| अहम् | I am |
| इति | thus |
| एव | only, indeed, exactly |
| कृष्ण (mfn) | black |
| क्रोध (m) | anger |
| च | and |
| ततः | after that, therefore, hence |
| तिष्ठति | stays, stands |
| दृष्ट (mfn) | seen |
| दृष्ट्वा | having seen |
| पश्यति | sees |
| पाद (m) | foot |
| पुत्र (m) | son |
| बालक (m) | boy |
| मुख (n) | mouth, face |
| य (m) | who, which |
| यथा .... तथा | as .... so |
| यावत् .... तावत् | as long as ... ...for so long (as soon as ... in the meantime) |
| व्यापादयति | kills (व्यापादित (was) killed, व्यापादितवत् killed) |
| स (m) | he |
| समीपे/समीपम् (n) (+ 6th) | near |
| सर्प (m) | snake |

## The brahmin and his faithful ichneumon

Part two: The mongoose looks after the child

ततस्तेन नकुलेन बालकसमीपमागच्छता कृष्णसर्पो दृष्टो व्यापादितश्च । अथासौ नकुलो ब्राह्मणमायान्तमवलोक्य रक्तविलिप्तमुखपादः सत्वरमुपागम्य तस्य चरणयोर्लुलोठ । ततोऽसौ ब्राह्मणस्तं तथाविधं दृष्ट्वा मम पुत्रोऽनेन भक्षित इत्यवधार्य व्यापादितवान् । अनन्तरं यावदसावुपसृत्य पश्यति ब्राह्मणस्तावद्बालकः सुस्थः सर्पश्च व्यापादितस्तिष्ठति । ततस्तमुपकारकमेव नकुलं निरूप्य विभावितकृत्यः संतप्तचेताः स परं विषादमगमत् । अतोऽहं ब्रवीमि ।

योऽर्थतत्त्वमविज्ञाय क्रोधस्यैव वशं गतः ।
स तथा तप्यते मूढो ब्राह्मणो नकुलाद्यथा ॥

The brahmin and his faithful ichneumon - Part two

**Underlined Vocabulary**

| | | | |
|---|---|---|---|
| नकुल m | ichneumon (mongoose) | उपकारक m | a helper |
| आयान्त mfn | coming | निरूप्य ind | having perceived |
| अवलोक्य ind | having observed | विभावित-कृत्यmfn | an action which has been provoked |
| ब्राह्मण m | Brahmin | मंतप्त mfn | grief-stricken |
| रक्त-विलिप्त- | smeared with blood | चेतस् n | mind, heart |
| उपागम्य ind | having approached | पर mfn | supreme, extreme |
| चरण m | foot | विषाद m | dejection |
| लुलोठ | he rolled (perfect tense) | अगमत् | filled with<br>(lit. 'he went to') |
| असौ m | he | अर्थ-तत्त्व n | the true facts of a case |
| तथाविधं ind | being in such a state | विज्ञाय ind | not knowing |
| भक्षित mfn | eaten | वश m (+गम्) | falls under the power of |
| अवधार्य ind | having ascertained, concluding | तप्यते | is tormented |
| उपसृत्य ind | having come near | मूढ mfn | confused, foolish |
| सुस्थ mfn | healthy | | |

Help with some samāsas:

his face and paws smeared with blood — रक्त-विलिप्त-मुख-पादः

he whose action had been rashly provoked — विभावित-कृत्यः

he whose heart was grief-stricken — मंतप्त-चेताः

the truth of a situation — अर्थ-तत्त्वम्

# VERSE SET TEXT

## The Bhagavad Gītā

The Bhagavad Gītā, which forms part of the great epic, the *Mahābhārata,* is one of the most famous and best-loved Sanskrit texts. Two armies, those of the Pāṇḍavas and the Kauravas, are on the battlefield preparing to fight. Arjuna, the champion of the Pāṇḍavas, is struck down with despair when he sees so many of his relatives and respected friends in the opposing army. He turns to his cousin and chariot driver, Kṛṣṇa, for advice. The Bhagavad Gītā is the conversation that then follows between Arjuna and Kṛṣṇa.

*[Note to teacher: This passage, and the other set texts in this series of books, needs to be thoroughly prepared by the students with your help.]*

PRESENTATION:

- The verse is given first in *sandhi* in the original form, followed by each word out of *sandhi* then an English translation
- There are many possible English translations – those appearing here are one version only
- There are also several published translations which give help with the detailed grammar

### Chapter 1 v 36

निहत्य धार्तराष्ट्रान् नः का प्रीतिः स्याज्जनार्दन।
पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥१॥३६॥

निहत्य । धार्तराष्ट्रान् । नः । का । प्रीतिः । स्यात् । जनार्दन ।
पापम् । एव । आश्रयेत् । अस्मान् । हत्वा । एतान् ।आततायिनः॥

*(Arjuna said:)*

1.36. O Janārdana (Kṛṣṇa), what satisfaction would there be for us, in striking down the sons of Dhṛtarāṣṭra? Guilt, indeed, would trouble us after killing these aggressors.

Notes: ______________________________________________________________________

______________________________________________________________________________

### Chapter 1 v 47

सञ्जय उवाच

एवमुक्त्वाऽर्जुनः सङ्ख्ये रथोपस्थ उपाविशत्।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥१॥४७॥

एवम् । उक्त्वा । अर्जुनः । सङ्ख्ये । रथ-उपस्थ । उपाविशत्।
विसृज्य । सशरम् । चापम् । शोक-संविग्न-मानसः ॥

*Sañjaya said:*

1.47. Having spoken thus on the battlefield, Arjuna sat down on the seat of his chariot, casting aside his bow and arrows, his mind distracted by grief.

Notes: ______________________________________________________________________

______________________________________________________________________________

### Chapter 2 v 3

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥२॥३॥

क्लैब्यम् । मा । स्म । गमः । पार्थ । न । एतत् । त्वयि । उपपद्यते
क्षुद्रम् । हृदय-दौर्बल्यम् । त्यक्त्वा । उत्तिष्ठ । परन्तप ॥

*(Kṛṣṇa said:)*

2.3. Do not give in to cowardice, O son of Pṛthā. It does not become thee. Abandoning this base weakness of heart, stand up, O tormentor of foes.

Notes: ______________________________________________________________________

______________________________________________________________________________

### Chapter 2 v 22

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥२॥२२॥

वासांसि । जीर्णानि । यथा । विहाय । नवानि । गृह्णाति । नरः । अपराणि
तथा । शरीराणि । विहाय । जीर्णानि । अन्यानि । संयाति । नवानि । देही

2.22. Just as a man, casting off old clothes puts on other new ones, so the embodied one, abandoning worn-out bodies, takes on others that are new.

Notes: ______________________________________________________________________

______________________________________________________________________________

### Chapter 2 v 48

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥२॥४८॥

योग-स्थः । कुरु । कर्माणि । सङ्गम् । त्यक्त्वा । धनञ्जय ।
सिद्धि-असिद्ध्योः । समः । भूत्वा । समत्वं । योग । उच्यते ॥

2.48. Fixed in Yoga, O Dhanañjaya, perform actions, giving up attachment, being unperturbed in success and failure; equanimity is called Yoga.

Notes: ____________________________________________________________

________________________________________________________________

### Chapter 2 v 65

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥२॥६५॥

प्रसादे । सर्व-दुःखानां । हानिः । अस्य । उपजायते ।
प्रसन्न-चेतसः । हि । आशु । बुद्धिः । पर्यवतिष्ठते ॥

2.65. When serenity of mind is reached, there is a cessation of all sorrows. For the intelligence of the peaceful-minded soon becomes steady.

Notes: ____________________________________________________________

________________________________________________________________

### Chapter 3 v 19

तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥३॥१९॥

तस्मात् । असक्तः । सततम् । कार्यम् । कर्म । समाचर ।
असक्तः । हि । आचरन् । कर्म । परम् । आप्नोति । पूरुषः ॥

3.19. Therefore, always perform the actions which should be done without attachment; for, performing action without attachment man attains the Supreme.

Notes: ______________________________________________________________________

______________________________________________________________________________

### Chapter 3 v 21

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥३॥२१॥

यत् । यत् । आचरति । श्रेष्ठः । तत् । तत् । एव । इतरः । जनः ।
सः । यत् । प्रमाणम् । कुरुते । लोकः । तत् । अनुवर्तते ॥

3.21. Whatever a great man does, that alone other men do; whatever example he sets, people follow that.

Notes: ______________________________________________________________________

______________________________________________________________________________

### Chapter 3 v 30

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥३॥३०॥

मयि । सर्वाणि । कर्माणि । संन्यस्य । अध्यात्म-चेतसा ।
निराशीः । निर्ममः । भूत्वा । युध्यस्व । विगत-ज्वरः ॥

3.30. Surrendering all actions to me, mind at rest in the Self, being free from expectation and selfish desire, freed from mental anguish, engage in battle!

Notes: ______________________________________________________________

______________________________________________________________________

### Chapter 3 v 35

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥३॥३५॥

श्रेयान् । स्व-धर्मः । विगुणः । पर-धर्मात् । सु-अनुष्ठितात् ।
स्व-धर्मे । निधनं । श्रेयः । परधर्मः । भय-आवहः ॥

3.35. One's own duty, though imperfect, is better than the duty of another successfully performed. Better is death in one's own duty; the duty of another brings danger.

Notes: ______________________________________________________________

______________________________________________________________________

### Chapter 4 v 10

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥४॥१०॥

वीत-राग-भय-क्रोधाः । मद्-मयाः । माम् । उपाश्रिताः ।
बहवः । ज्ञान-तपसा । पूताः । मद्-भावम् । आगताः ॥

4.10. Freed from passion, fear and anger, at one with Me, relying on Me, purified by the fire of wisdom, many have attained My state of Being.

Notes: ________________________________________________________________________

________________________________________________________________________________

### Chapter 4 v 19

यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥४॥१९॥

यस्य । सर्वे । समारम्भाः । काम-सङ्कल्प-वर्जिताः ।
ज्ञान-अग्नि-दग्ध-कर्माणम् । तम् । आहुः। पण्डितम् । बुधाः ॥

4.19. He whose undertakings are all devoid of desirous intentions, and whose deeds are all consumed in the fire of knowledge, him, the sages call wise.

Notes: ________________________________________________________________________

________________________________________________________________________________

### Chapter 5 v 10

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥५॥१०॥

ब्रह्मणि । आधाय । कर्माणि । सङ्गम् । त्यक्त्वा । करोति । यः ।
लिप्यते । न । स । पापेन । पद्म-पत्रम् । इव । अम्भसा ॥

5.10. Dedicating his deeds to Brahman, abandoning attachment, he who acts is not defiled by sin any more than a lotus leaf by water.

Notes: ______________________________________________________________________

________________________________________________________________________________

### Chapter 9 v 4

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥९॥४॥

मया । ततम् । इदम् । सर्वम् । जगत् । अव्यक्त-मूर्तिना ।
मत्-स्थानि । सर्व-भूतानि । न । च । अहम् । तेषु । अवस्थितः* ॥

9.4. This entire universe is pervaded by Me in My unmanifested form; all beings rest in Me, but I am not contained in them.

Notes: ______________________________________________________________________

________________________________________________________________________________

*अवस्थितः - having its place or abode, engaged in, fixed, following

### Chapter 9 v 7

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥९॥७॥

सर्व-भूतानि । कौन्तेय । प्रकृतिम् । यान्ति । मामिकाम् ।
कल्प-क्षये । पुनर् । तानि । कल्पादौ । विसृजामि । अहम् ॥

9.7. All beings, O Kaunteya, go to My Nature at the end of a Kalpa*. I generate them again at the beginning of the next Kalpa.

Notes: ______________________________________________________________________

______________________________________________________________________________

*Kalpa – 1,000 yugas, a day of Brahmā

### Chapter 9 v 26

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥९॥२६॥

पत्रम् । पुष्पम् । फलम् । तोयम् । येः । मे । भक्त्या* । प्रयच्छति ।
तत् । अहम् । भक्ति-उपहृतम् । अश्नामि । प्रयत-आत्मनः ॥

9.26. Whoever offers to Me with love, a leaf, a flower, a fruit or water, I enjoy that offering from the faithful one whose heart is pure.

Notes: ______________________________________________________________________

______________________________________________________________________________

*भक्ति – devotion, reverence, faith, trust

### Chapter 10 v 3

यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।
असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥१०॥३॥

यः । माम् । अजम् । अनादिम् । च । वेत्ति । लोक-महा-ईश्वरम् ।
असम्मूढः । सः । मर्त्येषु । सर्व-पापैः । प्रमुच्यते ॥

10.3. He who knows Me as unborn and beginningless, the Great Lord of the worlds, he among mortals is undeluded and liberated from all evils.

Notes: ______________________________________________________________________

__________________________________________________________________________

### Chapter 15 v 12

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥१५॥१२॥

यत् । आदित्य-गतम्* । तेजः । जगत् । भासयते । अखिलम् ।
यत् । चन्द्रमसि । यत् । च । अग्नौ । तद् । तेजः । विद्धि । मामकम्॥

15.12. That brilliance which exists in the sun causes the whole world to shine; that which is in the moon as well as in fire – know that light to be Mine.

Notes: ______________________________________________________________________

__________________________________________________________________________

*गत – gone, come forth, being in, situated in

### Chapter 18 v 53

अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥१८॥५३॥

अहङ्कारम् । बलम् । दर्पम् । कामम् । क्रोधम् । परिग्रहम् ।
विमुच्य । निर्ममः । शान्तः । ब्रह्म-भूयाय । कल्पते ॥

18.53. Having given up egoism, force, conceit, desire, anger, claim on property, free from selfishness and peaceful, he is fit for becoming Brahman.

Notes: ____________________________________________________________

__________________________________________________________________

### Chapter 18 v 56

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥१८॥५६॥

सर्व-कर्माणि । अपि । सदा । कुर्वाणः । मत्-व्यपाश्रयः ।
मत्-प्रसादात् । अवाप्नोति । शाश्वतम् । पदम्* । अव्ययम् ॥

18.56. Trusting in Me, even performing all actions, by My grace he reaches the eternal unchanging Abode.

Notes: ____________________________________________________________

__________________________________________________________________

*पद – characteristic, footing, standpoint, position